॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय ६०

ततस्तद्दारुणं कर्म दुष्करं साहसात्कृतम् ।
आचचक्षे मुनेः सर्वं सूर्यानुगमनं तथा ॥ १॥

भगवन्व्रणयुक्तत्वाल्लज्जया चाकुलेन्द्रियः ।
परिश्रान्तो न शक्नोमि वचनं परिभाषितुम् ॥ २॥

अहं चैव जटायुश्च सङ्घर्षाद्दर्पमोहितौ ।
आकाशं पतितौ वीरौ जिघासन्तौ पराक्रमम् ॥ ३॥

कैलासशिखरे बद्ध्वा मुनीनामग्रतः पणम् ।
रविः स्यादनुयातव्यो यावदस्तं महागिरिम् ॥ ४॥

अथावां युगपत्प्राप्तावपश्याव महीतले ।
रथचक्रप्रमाणानि नगराणि पृथक्पृथक् ॥ ५॥

क्व चिद्वादित्रघोषांश्च ब्रह्मघोषांश्च शुश्रुव ।
गायन्तीश्चाङ्गना बह्वीः पश्यावो रक्तवाससः ॥ ६॥

तूर्णमुत्पत्य चाकाशमादित्यपथमास्थितौ ।
आवामालोकयावस्तद्वनं शाद्वलसंस्थितम् ॥ ७॥

उपलैरिव सञ्छन्ना दृश्यते भूः शिलोच्चयैः ।
आपगाभिश्च संवीता सूत्रैरिव वसुन्धरा ॥ ८॥

हिमवांश्चैव विन्ध्यश्च मेरुश्च सुमहान्नगः ।
भूतले सम्प्रकाशन्ते नागा इव जलाशये ॥ ९॥

तीव्रस्वेदश्च खेदश्च भयं चासीत्तदावयोः ।
समाविशत मोहश्च मोहान्मूर्छा च दारुणा ॥ १०॥

न दिग्विज्ञायते याम्या नागेन्या न च वारुणी ।
युगान्ते नियतो लोको हतो दग्ध इवाग्निना ॥ ११॥

यत्नेन महता भूयो रविः समवलोकितः ।
तुल्यः पृथ्वीप्रमाणेन भास्करः प्रतिभाति नौ ॥ १२॥

जटायुर्मामनापृच्छ्य निपपात महीं ततः ।
तं दृष्ट्वा तूर्णमाकाशादात्मानं मुक्तवानहम् ॥ १३॥

पक्षिभ्यां च मया गुप्तो जटायुर्न प्रदह्यत ।
प्रमादात्तत्र निर्दग्धः पतन्वायुपथादहम् ॥ १४॥

आशङ्के तं निपतितं जनस्थाने जटायुषम् ।
अहं तु पतितो विन्ध्ये दग्धपक्षो जडीकृतः ॥ १५॥

राज्येन हीनो भ्रात्रा च पक्षाभ्यां विक्रमेण च ।
सर्वथा मर्तुमेवेच्छन्पतिष्ये शिखराद्गिरेः ॥ १६॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com